International Journal of Applied Research 2016; 2(2): 719-721




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2016; 2(2): 719-721
www.allresearchjournal.com
Received: 15-12-2015
Accepted: 17-01-2016

**डॉ. सुवल चन्द्र साहु**
व्याकरणविभाग: सरकारीडिग्री
संस्कृतमहाविद्यालय: वारिपदा, ओडिशा, भारत

Correspondence
**डॉ. सुवल चन्द्र साहु**
व्याकरणविभाग: सरकारीडिग्री
संस्कृतमहाविद्यालय: वारिपदा, ओडिशा, भारत

# पाणिनीयव्याकरणे स्फोटविमर्श:

**डॉ. सुवल चन्द्र साहु**

**उपक्रम:**

पदस्वरुपज्ञानाय व्याकरणमिति मतिमतां शब्दविदां सुप्रथित: सिद्धान्तं:। तत्र त्रिमुनि व्याकरणमेव शब्दज्ञानं जनकत्वात् सर्वैरेव तदेव तदेव समाश्रितम् । पाणिनिप्रणीताष्टाध्यायीव्याकरणस्य वेदाङ्गत्वेन महदुपकारत्वां वरीवर्त्ति इति पाणिनिनाऽपि संश्रितम् । मीमांसकमते स च सम्बन्ध: शक्तिपदार्थान्तरमिति, नैयायिकानां मते ईश्वप्रेच्छारुपसङ्केतो वा शक्तिरिति । सांख्या: योग अद्वैतवादिनश्च भेदाभेदरुपं तादात्म्यं शक्तिरिति कथयन्ति । तथा च आगम:- एक: शब्द: सम्यक् ज्ञात: सुष्ठुप्रयुक्त: स्वर्गे लोके च कामधुग् भवति इति । अत्र लोके इति शब्देन अयं लोक: गृह्यते । स्फोटात् हि लोकयात्रा प्रवर्त्तते ।
सिद्धान्ततया स्फोटवादो हि वैयाकरणानां प्रमुखत्वेन समभिव्यज्यते । शब्दस्य नित्यत्वात् (१) "तपरस्तत्कालस्य" सुत्रे भाष्ये - स्फोट: शब्द: ध्वनि: अत्र ध्वनिरेव स्फोटाख्यस्य शब्दस्य गुण उपकारक इति ।
भर्तृहरिणा (२) स्फोटरुपाविभगेन ध्वनेग्रर्हणमिष्यते । कैश्चिदध्वनिरसंवेद्या: स्वतन्त्रोऽन्यै: प्रकाल्पित:। कारिकायामस्यां स्फोटस्तथा प्राकृत ध्यनिज्ञानमेकत्वेन प्रतिभाति इति । महाभाष्ये (३) अथवा प्रतीतपदार्थको ध्वनि: शब्द इत्युच्यते इति वचनोपरि प्रदीपकार: कैयट: व्रव्रीति- "अन्यत्र ध्वनिस्फोटर्योभेदस्य व्यवस्यापितत्वादिहाभेदेन व्यवहारेणपि न दोष: द्रव्याद्रव्यौ न शब्दवाच्यौ इत्यत्र तात्पर्यात्।(४)"

**स्फोटपरिभाषा**

तत्र "स्फोट" विकसने इति धातुमाश्रित्यव्युत्पत्तित्रयं स्फोटशब्दस्य श्रमनन्ति । प्रथमं यथा- स्फुटयतेऽभिव्यज्यते वरर्गैरिति स्फोट:। द्वितीयं- स्फुटति अभिव्यक्ती भवति इति स्फोट:। तृतीयं- स्फुटति प्रकाशतेऽर्थ अस्मादिति स्फोट:। इति उपर्युक्तब्युत्पत्तित्रयं-स्वीकृत्य गङ्गधरपण्डितमहोदयेन "स्फोटदर्शन" नाम्निपुस्तकेऽपि स्फोटस्य लक्षणं प्रतिपादितं यत् "वर्णाभिव्यङ्गत्वे सति अर्थप्रततीतिजनकत्वं स्फोटत्वम्" मुख्यतया स्फोटवादो हि वैयाकरणानां प्रतिपाद्यविषय:। केचन अस्य स्फोटवादस्य प्रवर्त्तक: पतञ्जलि इति स्वीकुर्वन्ति। परन्तु शास्त्रनिचयमन्थनादवगम्यते यत् पाणिनिपूर्वदिव स्फोटायनाचार्यस्य सम्भवात् स्फोटायम एव अस्य प्रवर्त्तक:।

**व्याकरणे शब्दार्थ सम्वन्ध:**

अपशब्दान् अपपार्य साधुशब्दव्यवहाराय शब्दशास्त्रं नितरामपक्षतिमिति विपश्चितां मतम् । तथा चोक्तं वाक्यपदीये- साधुत्वज्ञानविषया सैषा व्याकरणस्मृति: इति। ऋग्वेदेऽपि वागेव विश्वा भुवनानि यज्ञे इत्युच्यते । एवञ्च-

"अनादि निधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।,
विवर्त्ततेऽर्थभाबेन प्रक्रिया जगतो यत:।। "

इति वार्यपदीयानुसार विश्वस्यास्य शब्दोपादानकत्वमसन्दिग्धं प्रतीयते । तत्र शब्दश्रवणानन्तरं अर्थावशेषविषविज्ञानं कस्यचित् भवति कस्यचिच्च न भवति। तर्हि अत्र अर्थप्रतिपादनेच्छया निर्गत: शब्द: व्यर्थ: सार्थको वेति जातायां जिज्ञासायामुच्यते यत् अस्ति शब्दार्थयो: कश्चन सम्बन्ध:, यद्ग्रहणे अर्थविशेषस्यसंप्रत्ययो भवति । प्राचीनवैयाकरणनां मते बोधकत्वं शक्तिरिति, नव्यास्तु शब्दस्थितिरभिहिता। तथा च-

क्षितौ चटचटाशब्दो जले बुदुबुदुध्वनि।,बह्नौ भुगुभुगुध्वनिर्वायौ विक्षीति शब्दनम्।।

वाक्यपदीये ब्रह्मकाण्डे-

अजस्त्रवृत्तिर्य: शब्द: सूक्ष्मत्वान्नोपलभ्यते
व्यजानात् वायुरिव स स्वनिमित्तात्प्रतीयते।
ओङ्कारश्चाथ शब्दश्च द्वावेतौ ब्रह्मण: पुरा
कण्ठं भित्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ।।

ब्रह्मसूत्र-२, भाष्यभामत्याम्।, पदार्थानां जन्म श्रुतं समुपपाद्या प्रदर्श्यते । तत्र श्रुतौ स भूरिति व्याहरन् स भूमिमसृजत्। भुवरित्यन्तरीक्षम् इत्यादि श्रुयते ।

वाक्यपदीयेऽपि-

शब्देष्वेवाश्रिताशक्ति: विश्वस्यास्य निबन्धनी
यन्नेत्र: प्रतिभात्मायं भेदरुप: प्रकाशते।।

अेत्रोच्यते वाह्यशब्दार्थवत् आभ्यन्तरा अपि शब्दा अर्थाश्च। ते च बौद्धा:, बुद्धौ समुपलभ्यमानत्वात्। बुद्धेरपि उपादानकारणत्वात् प्रकृतिविकृतिभावसत्त्वेन बौद्धयोरपि शब्दार्थयोस्तादात्म्यमेव सम्बन्ध:।

**शब्दस्याभिव्यक्ति प्रक्रिया**

सकलपदार्थबोधजनकतया स्वाभिव्यक्तिप्रकटीकरणाय शब्दा एव हेतुत्वेन समुल्लसिता प्रतीयन्ते ।

आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया।
मन: कायाग्निमाहन्ति स प्रेरयति मारुतम्।।
सोदीर्णमूर्धन्यभिहतो वक्त्र मापद्य मारुतम्।।

इत्युक्ता प्रक्रिया। सा तु सर्गादौ जातस्य स्थितस्य शब्दस्यैवाभिव्यक्तिप्रक्रिया न तूत्पत्तिप्रक्रिया। जनयते इत्यस्य अभिव्यञ्जयतीत्यर्थ:। अत्र कथ्यते यत् शब्दतन्मात्राणां कारणीभूत आत्मा परावाग्रुपेणाभिहित:, शब्दतन्मात्राणि तु परश्यन्तीशब्देन । वर्णवाक्यरुपाणि च मध्यमाशब्देन व्यवह्रियते। परश्रवणयोग्य: शब्दास्तावत् वैखरीशब्देनाभिधीयौ:। तथा चोक्तम्-परावाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ।।
अस्मिन् सन्दर्भे आत्मन: परा वागिति निर्देश: सार्थक्यं भजते, प्रकृतिविकृत्योस्तादात्म्यात्। उक्तं च-सवरुपज्योतिरेवान्त: परावागनपायिनी शब्दतन्मात्रस्य तु पश्यन्तीपदेन निर्देश:, अर्थमाश्रित्य ज्ञानविषयो भवति ।

**व्याकरणे शाब्दवोध:**

यद्यापि शब्दतन्मात्राणि सर्वेषां ज्ञानगोचराणि न भवन्ति, यत: वाग्योगिनां समाधौ ज्ञानगोचरत्वात्। परावाच: निर्देश: न ”क्वाप्युपलभ्यते । यदुक्तम्-

वैखर्या: मध्यमायाश्च पश्यन्त्याश्चैतद्भूतम् ।
अनेकतीर्थभेदायास्त्रय्या वाच: परंपदम् ।।

कािरकाप्रमाण्यात् भर्तृहरिणा वाच: त्रैविध्यमेव स्वीकृतम् । तत्र शब्दब्रह्मणि निष्णात:, परंब्रह्मणि निष्णात:, परंब्रह्माधिगच्छति इति वचनप्रामाण्यात् शब्दस्य ब्रह्मत्व उक्ति: यथार्था ।एवंविधविचारेण शब्दार्थविचारेण शव्दार्थयोस्तादात्म्यमेव भेदाभेदरूप इति । अतएव ओमित्येकाक्षरं ब्रह्म इति रामेति द्वयक्षरं, नाममानभङ्गापिनाकिन: इति, वृद्धिरादैच्, ईदूदेद्विवचनं प्रगृह्यम् इति च संज्ञासंज्ञिनो: सामानाधिकरण्येन निद्देश: । यथा नीलो घट: इति च । यदा अत्यन्तभेदपक्ष: स्वीक्रिय तदा गौरश्च इति । अत्यन्याभेदपक्हे घटो घट इति च । अधुना भाषाविज्ञानवादिभि: कथ्यते यत् पदपदार्थयो: सम्बन्धो न नित्य: । शब्दानां कालभेदेन अर्थान्तरेषु प्रयोगदर्शनात् । तत्र जीवनयात्रायां सर्वं ज्ञानकदम्वकं शब्दानुविद्धमेव प्रतीयते । तदुक्तम्–

न सोऽस्ति प्रत्ययो लोके य: शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ।।

तथा च रूपादयो विषया: शब्दरूपानुगता एव दृश्यन्ते । गौरिति शब्द: गौरित्यर्थवौधक: गौरितिज्ञानञ्च । अतोऽर्थानां प्रकृति: शब्दतत्तमेव ब्रह्म । लोके अखण्डशब्दराशय: यथा अधिगता: भवेयु: तदर्थं स्वल्पीयसा कालेन अल्पीयसाऽऽयासेन कृत्स्नमिदं व्याकरणशास्त्रं सर्वोत्कृष्टतां विभर्त्ति । गणपाठधातुपाठ- प्रत्याहाव्यवस्थादिभावेन वहव: पन्थान: एभि: संक्षिप्तानुशीलनै: समाश्रिता: सन्तीति विद्धभि: नाविदितम् । तत्र सर्वेषां शास्त्राणां शब्दमूलकत्वात्, साधुशव्दानां ज्ञानं च व्याकरणाधीनत्वात् व्याकरणशास्त्रास्य सर्व शास्त्राधिकारकमस्ति इति निश्चप्रच । काव्यादर्शे निगादितम्–

इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा ।
वाचामेव प्रसादेन लोकयात्रा प्रवर्त्तते ।।

**नित्यशब्दोपादानम्**

तत्र शब्दो जातिस्फोटादिरूपो नित्य: । अर्थोऽपि गातिरुपतया प्रवाहनित्यतया नित्य: । सम्बन्धिनां नित्यतया तयो: सम्वन्धस्य नित्यत्वम् । तस्मात् भाष्ये सिद्धे शब्दार्थसम्बन्धे इति वात्तिककार मतम् । शब्दश्च अर्थश्च सम्बन्धश्च, शब्दार्थसम्बन्ध इति समाहारदृन्द: । एवञ्च शव्दे अर्थे तयो: सम्बन्धे च सिद्धे सत्येवाचार्य: पाणिनि: स्वं शास्त्रं रचयामास न तु उत्पादयामास शब्दान् इति वोध्यम् । अत्र चतुर्भिस्तर्कै: सिद्धशब्दस्य नित्यत्वार्थकत्वं साधितम् । यथा-
क) संग्रहे किं कार्योऽथसिद्धशब्द: इति कार्यस्य अनित्यस्य प्रतिसिद्धतया सिद्धशब्द: प्रयुक्त: ।
ख) कुत्राचित् एकपदान्यापि अवधारणानि भवन्ति – अब्भक्ष: वायुभक्ष इति । अप् एव भक्षयति, बायुमेव भक्षयति इति गम्यते । अत्र यथा एवकाराभावेऽपि अवधारणं तथैव प्रकृतेऽपि सिद्ध एवान तु साध्य इति अवधारणं बोध्यम् ।
ग) अथवा –पूर्वपदलोपोऽत्र द्रष्टव्य: अत्यन्तसिद्ध: सिद्ध: । यथा- देवदत्त: दत्त इति ।
घ) व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम् । एवं च सिद्धशव्द: नित्यपर्यायवाचीति व्याख्याय सन्देह: निवारणीय: । यद्यपि प्रयत्नो व्याख्यातव्य सिद्धशब्दोपादानकत्व, नित्यशब्दोपादाने लाघवं प्रतीयतेतथापि नित्यप्रहसित:, नित्यप्रजल्पित:, इत्यादौ नित्यशब्दस्यापि कार्यार्थे प्रयोगदर्शनात् तस्याप्युपादाने व्याख्यानस्यापेक्षया सिद्धशब्द: याथार्थं संगच्छते । कात्यायनेन महत: शस्त्रौघस्य मङ्गलार्थं सिद्धशव्द एवोपात्त: ।

**शब्दाद्वैततत्वम् -** चित्तशुद्धिद्वारा ज्ञानोत्पत्तिरिति शव्दानां वृत्ति: दृश्यते । तदुक्तं हरिणा वाक्यपदीये-

तस्मात् य: शब्दसंस्कार: संसिद्धि: परमात्मन: ।,
तस्यप्रवृत्तितत्वज्ञानस्त्ब्रह्मामृतश्नुते ।।

तस्मात् शब्दस्य यथोपदर्शितमाहात्मसत्वात् व्याकरणहेतुक: य: शब्दसंस्कार: साधुशब्दानामपभ्रंशोभ्यो विवेकेन ज्ञानम्, सा परमात्मन: सिद्ध: सिद्धयुपाय: कथम् इति चेत् तस्य प्रवृत्तित्वज्ञ: इति, प्रवृत्ति नाम क्रिया, ते च

हड्भावविकारा:। यता- जायते, अस्ति, वर्धते, विपरिणमते ऽ अपक्षीयते, नश्यति इति तेषां तत्वं सत्ता परम्ब्रह्मरूपा, तत्तज्ञ:, व्याकरनहेतुकशब्दसंस्कारन्नधर्मविशेसहकारेण शब्दप्रवृत्तितत्तज्ज्वैयाकरण : । तत् श्रुयत्यादिप्रसिद्धम् अमृतं जरामरणवर्जतं ब्रह्म। वस्तुत: स्वात्मभूतम् अश्नुते, व्याप्नोति, प्रप्नोति, अभेदेन साक्षात् करोति । अत्र इदमेव तत्वम् साधुत्वव्यवस्थापनया अपशब्देभ्य: साधयशब्देषु व्याकरणज्ञानेन पृथक् क्रियामाणेषु ऐहलौकिक: धर्म: पारलौकिकश्च स्वर्गादिप्रप्तिलक्षणोऽभूदय: तता च आगम: एक: शव्द: सम्क् ज्ञात: सुष्ठुप्रयुक्त: स्वर्गे लोके च कामधुक् भवति इति । अत्र लोक: इति शव्देन अयं लोक: गृह्यते । तत्र जगत: स्वर्गस्तितिप्रलयानुकूलशक्तिसम्पन्नां परंव्रह्मरूपां सत्तां सम्यगवबुध्य निश्चितमेव परब्रह्माप्रप्तिरूपस्य क्षेत्रस्य प्राप्तिरिति ।

**उपसंहार:**

श्फोटात्मकशब्दादेव सृष्टिरितिपक्षमाश्रित्य शब्धे अर्थोपदानत्वस्य सुवचत्वात् । बौद्धस्यौवार्थस्य शब्दाबोधविषयत्वमिति पक्षे सुतरां तद्सम्भवाच्च । एवञ्च व्यवहारादेरपि शक्तनुमानम् उतराध्यासात्मकसङ्केतानुमानपूर्वकमेव । इतरेतराध्यासात्मकाङ्केतश्च योऽर्थ: स : शव्द:, य: शब्द: सोऽर्थ: इत्याकारक: ईश्वरकृत: वाच्यवाचकभावरूपां शाक्तिं ग्राहयति ऽ। तदुक्तं पातञ्जलाभाष्ये तस्य वाचक: पे्नव: इति सूत्रे स्तितोऽपि वाच्यस्य वाचकेन सम्बन्ध: । संङ्केतेनावद्योत्यते अयमस्य पिता अयमस्य पिता अयमस्य पुत्र ंति । अनेन च ईश्वरसङ्केतस्य शक्तिज्ञाषकत्वं स्पष्टमोवोक्तम् ।
अनादिनिधनं ब्रह्म शब्दतत्तं यदक्षरम् ।
अथात् आत्मा वाच्य: शब्दब्रह्मरूपो स्फोटो वाचक: तत: वाक् चतुष्टयं वर्थते यथा- परा, पश्यन्ती, मध्यमा, वैखरी इति । तत्र-

मूलाधारात् प्रथमसमुदितो यस्तु भाव: पराख्य:।,
पश्चात्पश्यन्त्यथ हॠदयगौ बुद्धियुङ्मध्यमाक्ष: ।

उक्तं च वाक्यपदीये हरिणा-

परा वाङ्मूल चक्रस्था पश्यन्ती ना भिसंस्तिता ।
हदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ।।

**ततस्तस्यैव स्फोटरूपिण्या: वाच: विभागचतुष्टयं क्रियते**

१. निर्विकल्पज्ञानरूपपरा वाक्
२. सविकल्पज्ञानरूपपश्यन्ती वाक्
३. स्फोटरूपवैखरी वाक् । ४.वाक्यरुपवैखरी वाक् । इति । अनया रीत्या स्फोटस्तु शाब्दवोधस्य प्रमुखकारणत्वेन वरीवर्त्ति।

**सहायकग्रन्थसूची**


१. पा- सू- १-१-७०
२. वा-प-व्र-का- ८१
३. मभा- पस् पस्
४. मभा- पस् पस्- प्रदीप:
५. वैयाकरण लघुमञ्जूषा, नागेशभट्ट, सम्पूर्णानन्दविश्वविद्यालय, वारणासी।१९७९।
६. काव्यादर्श, चौखम्वा विद्याभवन,१९५८।